M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1464

Title: Shanti Sukta (?)

1464

oncomplete

		S'rauta sutra (?)	Title
			Author
			Editor
			Year, Vols.
			Publisher
1464		Pages 2 – 17	Remarks

Dharmas'āstra.

दः॥ एषमग्नेपिसर्वत्रविनियोगः। ॐ कुषुंभकस्तदब्रवीद्गिरेः प्रवर्त्तमा
नकः॥ वृश्चिकस्यारसंविषमरसं वृश्चीक ते विषं॥ स्वाहा॥
सूर्यायेदं०॥ त्वमग्ने द्युभिरित्यस्य मंत्रस्य शौनको गृत्समद ऋषिः अग्निर्दे
वता जगती छंदः। उ० तस० ॐ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्व
मश्मनस्परि॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिस्वा
हा। अग्नय इदं०॥ आवदंन्नित्यस्य मंत्रस्य शौनको गृत्समद ऋषिः। शकुंतो
देवता जगती छंदः। ॐ आवदंस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुम
तिं चिकिद्धि नः। यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवी

२ ए स्वाहा ॥ अंकुतायेदं ॥ सोमस्य मेत्यस्य मंत्रस्य गाथिनो विश्वामित्र ऋषिः अग्नि
देवता ॥ त्रिष्टुप् छंदः ॥ ॐ सोमस्य मा तवसं वक्ष्यग्ने वह्निश्चकर्थ विदथे यज
ध्यै । देवां अच्छा दीद्यद् युंजे अद्रिं शमाये अग्ने तन्वं जुषस्वः स्वाहा । अग्नये० । गृ
णानेत्यस्य मंत्रस्य भार्गवो जमदग्नि ऋषिः मित्रावरुणौ देवता गायत्री छंदः ॥
ॐ गृणाना जमदग्निना योनावृतस्य सीदतं । पातं सोमम् ऋतावृधा स्वाहा । मित्रावरुणा
भ्यामिदं ० त्वां ह्यग्न इत्यस्य मंत्रस्य गौतमो वामदेव ऋषिः अग्निर्देवता अष्टी
छंदः ० ॐ त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा
न्येरिरे । अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं

जनत प्रचेतसं स्वाहा । अग्नय इदं ० धामन्त इत्यस्य मंत्रस्य गौतमो वामदेव ऋ
षिः आपो देवता जगती छंदः ॐ धामन्ते विश्वं भुवनमधिश्रितमन्तः समु
द्रे हृद्यन्तरायुषि । अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं
त ऊर्मिं स्वाहा । अद्भ्य इदं ॥ अबोध्यग्निरित्यस्य मंत्रस्य आत्रेयो बुधगविष्ठि
रावग्निस्त्रिष्टुप् छंदः ॐ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवाय
तीमुषासं । यह्वा इव प्रवयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ स्वाहा ।
अग्नय इदं ॥ ॐ गंता न इत्यस्य मंत्रस्य आत्रेय एवयामरुत ऋषिः मरुतो
देवता अतिजगती छंदः ॐ गंता नो यज्ञं यज्ञियाः सुशमि श्रोता हव

मरुत्सख्येव यामरुतं अग्नासो न पचेतासो योमनिमूपं त्रस्य मंचे त्तस स्यात दू
र्ध्वत्ती वो निरः स्वाहा। मरु अरुद्दं०। त्वं ह्यग्ने इति मंत्रस्य बार्हस्पत्यो भारद्वाज ऋषिः
अग्नी देवता। त्रिष्टुप् छंदः ०। ॐ त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म हो
ता। त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै स्वाहा। अग्नय इदं०॥
यो नस्व इत्यस्य मंत्रस्य। पायुर्भारद्वाज ऋषिः देव ब्रह्माणी देवता अनुष्टुप् छंदः
ॐ। यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म मम
मांतरं स्वाहा। देव ब्रह्मभ्य इदं०। अग्निं नर इत्यस्य मंत्रस्य मैत्रावरुणी वसिष्ठ ऋ
षिः अग्निर्देवता विराट् छंदः ०। ॐ अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जन

यंत प्रशस्तं। दूरे दृशं गृहपतिमथर्युं स्वाहा। अग्नय इदं०। प्रति चक्ष्व इत्यस्य
मंत्रस्य मैत्रावरुणिर्वसिष्ठ ऋषिः। इंद्रासोमौ देवता अनुष्टुप् छंदः ०
ॐ प्रति चक्ष्व वि चक्ष्वेंद्रश्च सोम जागृतं। रक्षोभ्यो वधमस्यतमशनिं
यातुमद्भ्यः स्वाहा। इंद्रासोमाभ्यामिदं॥ मा चिदित्यस्य मंत्रस्य काण्वः प्र
गाथ ऋषिः। इंद्रो देवता बृहती छंदः ०। ॐ मा चिदन्यद्वि शंसत सखायो
मा रिषण्यत। इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत।
स्वाहा। इंद्रायेदं०॥ आग्नेयाहित्यस्य मंत्रस्य काण्वः सोभरिरृषिः॥

४

अग्नामरुतौ देवता अनुष्टुप् छंदः ०। ॐ आग्ने याहि मरुत्सखा रुद्रे
भिः सोमपीतये। सोभर्या उपसुष्टुतिं मादयस्व स्वर्णरे स्वाहा। आग्ना
मरुद्भ्य इदं०। स्वादिष्ठयेति मंत्रस्य वैश्वामित्रो मधुछंदा ऋषिः पवमान
सोमो देवता। गायत्री छंदः ०। ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम
धारया।। इंद्राय पातवे सुतः स्वाहा। पवमानाय सोमाय इदं०। यत्ते राजं
न्नित्यस्य मंत्रस्य मारीचिः कश्यप ऋषिः पवमानः सोमो देवता पंक्तिश्छं
दः ०। ॐ यत्ते राजं छृतं हविस्तेन सोमाभिरक्षनः। अरातीवामा ४

नस्तारिन्मोचनः किंचनाममदिंद्रायेंदो परिस्रव स्वाहा। पवमान सोमा
येदं०। अग्ने त्वं न इत्यस्य मंत्रस्य आस्यचित्त ऋषिः अग्निर्देवता त्रिष्टुप् छं
दः ०। ॐ अग्ने त्वं हन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात्
अग्निर्भानुना रुशता स्वंग आजातो विश्वा सद्मान्यप्राः स्वाहा। अग्नय
इदं०। समानी व इत्यस्य मंत्रस्य आंगिरसः संवनन ऋषिः संज्ञानं देवता अ
नुष्टुप् छंदः ०। ॐ समानीव आकूतिः समाना हृदयानि वः। समानमस्तु
वो मनो यथा वः सुसहासति स्वाहा। संज्ञानाय इदं०। इति शाकल्लोनं।।

५

तच्छंयोरित्यस्य शंयुर्बार्हस्पत्य ऋषिः विश्वेदेवो देवता शक्करी छंदः ॥ तच्छंयोरा॰ स्वाहा ॥
विश्वेभ्यो देवेभ्य इदं ॰ इति बाष्कलानां ॥ शाकलानां समानी व इत्यस्य चाहुत्याति
भवेत् ॥ बाष्कलानां तु तच्छंयोरित्यस्य चाहुतिर्भवेदिति कारिकोक्तेः ॥
ततः स्वोत्तरं कृतं हुत्वा ... सर्वैः सह प्राणायामं कृत्वा पृथ्वीत्य
स्य मंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः ॥ ॐ
पृथ्वी त्वया धृता लोका ॰ त्वं च धारय मां देवि ॰ अपसर्पंतु ते भूता ॰
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ अनेन भूतानुत्साद्य ॥

रसावेजं तं कुर्यात् आचम्य । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीति ॥ त
तो जलमभिमंत्र्योपस्थे कृत्वा दक्षिणं ... ब्रह्मांजलिं निधाय । प्राणायामादि स्वय
मुच्चरयन् ... ध्यानपूर्वकमुपविश्याचमेत् । प्रणवस्य परब्रह्म ऋषिः पर
मात्मा देवता दैवी गायत्री छंदः । व्याहृतीनां जमदग्नि भरद्वाज भृग
वः ऋषयः अग्नि वायु सूर्या देवता वि गायत्री दैवी उष्णिक् दैवी बृहत्यः
छंदांसि । गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छंदः अग्निमी
ळ इत्यादीनां छंदसां वैश्वामित्रो मधुच्छंदा आदय ऋषयः ॥ अग्न्यादयो

६

देवतागायत्र्यादीनि छंदांसि। सर्वेषामुत्सर्जने विनियोगः। पश्चादूर्ध्वं शस्म
वीं गायत्रीं वदित्वा। अग्निमीळे इति नवर्चं सूक्तं। अनुवाकं वा। इषेत्वोर्जेत्वा।
अग्न आयाहि वीतये। शन्नो देवीरभिष्टये। अग्निर्वै देवानामवमो विष्णुः
परमः। अथ महाव्रतं। एष पंथा एतत्कर्म। अथातः संहिताया उपनिष
त्। विदा मघवन्विदा। महाव्रतस्य पंचविंशतिं सामिधेन्याः॥ अथैतस्य सम
म्नायस्य। मयरसतजभनलगसंमितं। पंचसंवत्सरमयं। गोः। ग्मा। समा
म्नायः। स्य समाम्नाताः। अथ शिक्षां प्रवक्ष्यामि। वृद्धिरादैच्। यो

६

गीश्वरं याज्ञवल्क्यं॥ नारायणं नमस्कृत्य। अथातो धर्मं व्याख्यास्यामः। अथा
तो धर्मजिज्ञासा। अथातो ब्रह्मजिज्ञासा॥ तच्छंयोरावृणीमहे। गातुं यज्ञाय
गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेष
जं। शं नो अस्तु द्विपदे शं चतुष्पदे। नमो ब्रह्मणे नमोस्त्वग्नये नमः पृथि
व्यै नमः ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे महते क
रोमि। भद्रं नो अपि वातय मनः। ॐ शांतिः शांतिः शांतिः॥ ततः सर्वे उत्स
र्गं विवेदा इत्युक्त्वा ब्रह्मस्वन्नायुः। तत आचार्यः प्रायश्चित्तादि होमशे
षं समाप्य उदकतीरं गत्वा शरीरशुद्ध्यर्थं मुत्सर्जनांग स्नानं सर्वैः सह स्नानि

९

कुर्यात्। तद्यथा। प्रणानायम्य देशकालौ स्मृत्वा उत्सर्जनांगत्वेन गणस्ना
नं महं करिष्ये॥ भस्मादाय। ईशानाय नम इति शिरसि। तत्पुरुषाय नम इति
मुखे। अघोराय नम इति हृदये। वामदेवाय नम इति गुह्ये। सद्योजाताय
नम इति पादयोः। प्रणवेन सर्वांगेषु। ततः। अग्निरिति भस्म। जलमिति भस्म
स्थलमिति भस्म। व्योमेति भस्म। सर्वं ह वा इदं भस्मेति। मानस्तोके इति सर्वां
गे विलिप्य। स्नात्वाचम्य। गोमयं गंधद्वारामित्यादाय अग्रमग्रं चरंतीनां
ओषधीनां वने वने। तासामृषभपत्नीनां पवित्रं कायशोधनं। त्वं मे रोगांश्च
शोकांश्च नुद गोमय सर्वदेति शिरःप्रभृत्यंगानि विलिप्य। स्नात्वाचम्य।

८

द्विर्वा स्वनिर्जहि। इति हस्तयोः। आंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि।
यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते॥ पुरुषसूक्तेन सर्वांगे। अश्वक्रां
ते रथक्रांते विष्णुक्रांते वसुंधरा। शिरसा धारयिष्यामि रक्षस्व मां पदे प
दे॥ इति सतिल दूर्वा मृदं शिरसि निधाय मृत्तिकास्नानं प्रक्षाल्य॥ हिरं
ण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पा
पेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा दुष्कृतं कृतं। तन्न इंद्रो
वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः। इमं मे गंगे यमुने सरस्वति
शुतुद्रि स्तोमं सचता परुष्ण्या। आसिक्न्या मरुद्वृधे वितस्तयार्जी

कीयेश्वरणुस्यास्तुषामया। इदं तेन्याभिरस्मानमद्रियाः काश्यसिंधुम वहंति
नद्यः। सर्वोज्जीर्णमिवत्वचं जहाति पापं सन्निरस्को भ्युपेत्य। गंगां गंगेति यो
ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥
शमित्र्यान अप ओषधयः संतु। दुर्मित्र्यास्तस्मै संतु योस्मान् द्वेष्टि यं च वयं द्वि
ष्मः॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविशमानाः। इंद्रो या वज्री वृ
षभो रराद ता आपो देवीरिह मामवंतु॥ या आपो दिव्या। उत वा स्रवंति
खनित्रिमा उत वा याः स्वयंजाः॥ समुद्रार्था याः शुचयः पावकास्ता॥ आपो
देवीरिह मामवंतु। यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां॥

मधुः श्चुतः शुचयाः पावकाः स्ता आपो देविरिह मामवंतु॥ यासु राजा वरुणो या
सु सोमो विश्वे देवा यासूर्जो। र्जं मदंति। वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो दे
वीरिह मामवंतु॥ ४ ए तो विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं
शुद्धः आशीर्वान्ममत्तु॥१॥ इंद्र शुद्धो नऽआगहि शुद्धः शुद्धाभिरूतिभिः॥ शु
द्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः॥२॥ इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि
दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि॥ तरत्समंदी
धावति धारा सुतस्यांधसः। तरत्समंदी धावति। उस्रा वेद वसूनां मर्तस्य
देव्यवसः। तरत्समं०। ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे। तरत्स०। आप

११ येस्मिं स्थितं तना सहस्राणी चक्षसेहा।। तरत्समं।। त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः
सोम धामभिः। अग्ने दक्षैः पुनीहि मा। प्र प्यायस्व प्रस्यंदस्व सोम विश्वेभिरंशु
भिः। देवेभ्य उत्तमं हविः। उप प्रियं पनिप्नतं युवानमाहुतीवृधं। आगन्म
बिभ्रतो नमः। अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोमा। आखुं
चिदेव देव सोमा। यः पावमानीरध्येत्यृषिभिः संभृतो रसं।। सर्वं स पूत
मश्नाति स्वदितं मातरिश्वना।। पावमानीर्यो अध्येत्यृषिभिः संभृतो रसं। तस्मै
सरस्वती दुहे क्षीरं सर्पिर्मधूदकं।। पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः।।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितं। पावमानीर्दिशंतु न इमं लोक

मथो अमुं। कामान्समर्धयंतु नो देवैर्देवीः समाहिताः। येन देवाः पवित्रेणा
त्मानं पुनते सदा। तेन सहस्रधारेण पावमान्यः पुनंतु मा। प्राजापत्यं पवि
त्रं शतोद्यामं हिरण्मयं। तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे। इंद्रः सुनी
ती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या। यमो राजा प्रमृणाभिः पु
नातु मां जातवेदा मूर्जयंत्या पुनातु।। ४। आपो हि ष्ठेति तिसृभिर्मा
र्जयित्वा इमं मे गंगे सूक्तं मा लोड्य। ऋतं च सत्यं चेति तृचेना घम
र्षणं कृत्वा।। प्रवाहाभिमुखः क्षिप्रं जलं त्यां चम्य स्नानांग तर्पणं कृत्वा।। त
द्यथा।। ॐ ब्रह्मादयो ये देवाः स्तान् देवांस्तर्पयामि।। सर्वदेवांस्तर्पे०। भूव

१२

दैवांस्त० स्वर्देवांस्त० भूर्भुवस्वर्देवांस्त० इत्यादि पापनादयो ये ऋषयः०॥ तांन्
षीस्त० भूरृषींस्त० भुवरृषींस्त० स्वरृषींस्त० भूर्भुवस्वरृषींस्त० अप० सोमः
पितृमान्यमोंगिरस्वान ग्निष्वात्ताः कव्यवाहनादयपीतरः तान्पितॄंस्तर्पया
मि॥ भूः पितॄंस्त० भुवः पितॄंस्त० स्वः पितॄंस्त० भूर्भुवस्वः पितॄंस्त० अग्निदग्धा
श्चये जीवाये प्यदग्धाः कुले मम। भूमौ दत्तेन तोयेन तृप्ता यांतु परां गतिम्
त्रिजलांजलिं तटे निक्षिप्य॥ यन्माया दूषितं तोयं शरीरमलसंभवात्॥ तद्दोष
परिहारार्थं यक्ष्माणं तर्पयाम्यहं॥ यक्ष्म तर्पणं कृत्वा ऋषिन्पूजयेत्॥ ऋषि
न्दर्भमयान्कृत्वा पूजयेत्ततः तत्रैव थं॥ आचम्य प्राणानायम्य। ऋषीन्पूजयेत्

कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गोतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः
स्मृताः॥ अरुंधतीसहितान्सप्तऋषीन् आवाहयामि॥ तदस्तु मित्रा। गृहावेप्रति
ष्ठा॥ अरुंधतीसहितेभ्यः सप्तऋषिभ्यो नमः॥ आसनं पाद्यमार्घ्यमाचनी
यं॥ स्नानीयमाचमनियं वस्त्रयज्ञोपवीतं गंधं पुष्पाणि धूपंदीपं नैवेद्यं फलं तां
बूलं दक्षिणां अरुंधतीसहितेभ्यः सप्तऋषिभ्यो नमः। पंचपूजां तत्र समर्पया
मि। मंत्रहीनं क्रियाहीनं आवाहनं न जानामीति क्षमाप्य॥ ततः सावित्र्यादिं स्तर्प
येत्॥ नेन च॥ सावित्रीं तर्पयामि। ब्रह्माणं० श्रद्धां० मेधां० प्रज्ञां० धारणां० सदसस्पतिं०
अनुमतिं० छंदांस्पृषीस्तर्पयामि। अग्निं० सूर्यं० अग्निं तर्पयामि। ऋतुं० अग्निं०

१३ मित्रावरुणौ॰ अग्निं॰ आप॰ अग्निं॰ मरुतः॰ अग्निं॰ एरेद्य ब्रह्माणि॰ अग्निं॰ इंद्रा
सोमौ॰ इंद्रं॰ अग्नामरुतस्तर्पया॰ पवमानसोमं॰ अग्निं॰ संज्ञानं तर्पयामि॥ ब्रह्म
यज्ञांगमुक्तं यत्तर्पणं स्यादिहापि तत्तद्गृह्यकारिकोक्तेः॥ प्रजापतिस्तृप्यतु। ब्रह्मा
तृप्यतु। वेदास्तृप्यंतु। देवास्तृप्यंतु। ऋषयस्तृप्यंतु। सर्वाणि छंदांसि तृप्यंतु। ॐका
रस्तृप्यतु॰ वषट्कारस्तृप्यतु। व्याहृतयस्तृप्यंतु। सावित्री तृप्यतु। यज्ञास्तृप्यंतु।
द्यावापृथिवी तृप्येतां। अंतरिक्षं तृप्यतु। अहोरात्राणि तृप्यंतु। सांख्यास्तृप्यंतु।
सिद्धास्तृप्यंतु। समुद्रास्तृप्यंतु। नद्यस्तृप्यंतु। गिरयस्तृप्यंतु। क्षेत्रौषधिवनस्प
तिगंधर्वाप्सरसस्तृप्यंतु। यक्षास्तृप्यंतु। रक्षांसि तृप्यंतु। भूतानि तृप्यंतु। एव

मंतानि तृप्यंतु। अथ ऋषयः। शतर्चिनस्तृप्यंतु। माध्यमास्तृप्यंतु। गृत्सम
दस्तृप्यतु। विश्वामित्रस्तृप्यतु। वामदेवस्तृप्यतु। अत्रिस्तृप्यतु। भरद्वाजस्तृ
प्यतु। वसिष्ठस्तृप्यतु। प्रगाथास्तृप्यंतु। पावमान्यस्तृप्यंतु। क्षुद्रसूक्तास्तृप्यंतु।
महासूक्तास्तृप्यंतु। प्राचीनावीती॥ अत्र जीवत्पितृकस्यापसव्यविशेषमाह। अ
पसव्यं द्विजाग्र्याणां पित्र्ये सर्वत्र वर्तितं॥ अप्रकोष्ठात्र कर्तव्यमातापित्रो
स्तु जीवतोरिति त्रिंशच्छ्लोक्याचारात्॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्य
भारतमाहाभारतधर्माचार्यास्तृप्यंतु। जानंतिबाहविगार्ग्यगौतमशाक
ल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु। गार्गी वाचक्नवी तृप्यतु। वडवा प्राति

१४ थेयी तृप्यतु। सुलभा मैत्रेयी तृप्यतु। कहोडं तर्पयामि। कौषीतकं तर्पयामि॥
महाकौषीतकं त०। पैंग्यं त०। महापैंग्यं०। सुयज्ञं त०। सांख्यायनं०। ऐतरेयं तर्पयामि॥
महैतरेयं०। शाकलं त०। बाष्कलं तर्पयामि॥ सुजातवक्त्रं०। औदवाहिं त०। सौजा
मिं तर्पयामि०। शौनकं तर्पयामि०। आश्वलायनं त०। ये चान्ये आचार्यास्ते सर्वे
तृप्यन्तु॥ अत्र कारिका॥ त्रिः शोध्य एकैकेनैवं दद्याद्दैवे श्चात्तथा भवेत्॥ त्र
याग्निं त्रीणि वाक्येस्तु देवर्षिपितृन्नेकमातृः॥ ॥अस्मत्पितरममुकगोत्रममुक
शर्माणं वसुरूपं तर्पयामि॥ मातुलं। भ्रातरं। पितृष्वसारं। मातृस्वसारं। आत्म
स्वसा। यथा योग्यसपत्नीकान्॥ सपुत्रान् तनयांश्च। श्वशुरं। गुरुं च तर्पयेत्॥

आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः॥ तृप्यन्तु पितरः सर्वे मातृमातामहा
दयः॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनां॥ आब्रह्मभुवनाल्लोकादिद
मस्तु तिलोदकं॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते
गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकं॥ इति उत्तरीयवस्त्रं तटे निष्पीड्य सव्ये
न यमादीन् तर्पयामि॥ धर्मराजं त०। मृत्युं तर्पया०। अंतकं त०। वैवस्व
तं०। कालं तर्पयामि॥ सर्वभूतक्षयं तर्पयामि। औदुंबरं त०। दध्नं०। नी
लं त०। परमेष्ठिनं त०। वृकोदरं त०। चित्रं त०। चित्रगुप्तं तर्पयामि॥ ततो॥
यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः। भूताधिपो

१५ दत्तक्तानुसारीवत्तांतमतद्भूभिर्जपंति। इति दृष्टा चारं जपेत्॥ त
तः शांत्यर्थं। नो भद्राः॥ आ न इंद्राग्नी॥ त्वमुष्य चाक्रिनमितिसुक्तानि॥
सुवचस्यर्थं तिस्रो वाचः। पर्जन्याय प्रगायत। अच्छा वद तवसं। बलित्था
पर्वतानां। प्रदेवत्रा ब्रह्मण एतानि पर्जन्यसूक्तानि। इह स्वतेप्रतिमे देव
तामहि। ऋषयो वैसरस्वत्यां सत्रमासत इति ब्राह्मणं चैके ह्रिकाः पठंति॥
ततो वैश्वप्रीत्यर्थं ब्राह्मणान् भोजयेत्॥ विश्वे ता ते सवनेषु प्रवाच्या या च
कर्थ मघवन्निंद्रसुन्वते॥ पारावतस्य रातिषु॥ सं भ तं वस्य पावमानाः आरभा
यरुषि बंधयेत्॥ अनेन ऋषीनुल्लेखेत् उद्वासयेत्॥ इत्युत्सर्जनं॥ ॥ अथो १५

चार्याः सुस्नातः प्राणानायम्य देशकालौ स्मृत्वा मम आध्याय्यानां मध्येष्य
माणानां च छंद आरीनां यातयामतानिरासेनाप्यायनद्वारा श्रीपरमे
श्वरप्रीत्यर्थमुपाकरणाख्यं कर्म करिष्ये इति संकल्प्य। नूतन ब्रह्मचा
रिणउपाकरणे विशेषः॥ अस्य ब्रह्मचारिणो वेदग्रहणाधिकारसिद्ध्य
र्थं श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं कर्म करिष्ये॥ इति संकल्प्य ग
णेशपूजनस्वस्तिपुण्याहवाचनं नांदीश्राद्धं॥ निरु चाग्निमति ह्यां तेऽन्वा
दध्यात्॥ तत्रोपाकरणाख्यकर्मणि देवतापरिग्रहार्थं मित्यादि चक्षुषी आज्य
नेताः प्रधानदेवता आज्येनेऽत्र मुक्त्वाग्निमित्यादि संहितानां ताः

३६ धानदेवताः दधिसक्तुद्रव्यं न्प्रोक्षणं क्रियंच तत्तोमिथमस्त्ववहतेन नरऊं म यज्ञोप
वितेन परमात्मानमपामग्निमित्यादिसद्योच्चश्चैः स्तं तमुक्त्वा परिसमूहना
दिपूर्णपात्रनिधानांतमाज्ञेरभ्योगद्यपात्रक्षेपांतं कृत्वा दधिसक्तुन चरूस्था
लीस्थानपित्तपात्रे निधायाग्निना सह पर्यग्निकरणादिनवप्रधानाज्याहु
त्यंतं प्राग्वत् कृत्वा सूच्यवदायावदान धर्मेण दधिसक्तून च दायाग्निमी
छ दुत्यादिभिर्मंत्रैर्हुत्वा स्विष्टकृदजुहूत्करणे कृत्वा दधिसक्तू प्राश्नी
यु दधिक्राव्णइत्यस्य मंत्रस्य वामदेव ऋषिः। दधिक्रा वा देवता अनु
ष्टुप् छंदः। ॐ दधिसक्तु प्राशने विनियोगः। ॐ दधिक्राव्णो अकारिषमिति ३६

ॐ रश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रण आयूंषि तारिषत् प्राश्याचम्य ततो
मार्जनपरिस्तरणदर्भाणामधस्तात् दर्भलिंगनि धायान्यनापः चयित्वा मार्जयि
त्वा॥ ॥ततो यज्ञोपवीतमित्यस्य मंत्रस्य। परब्रह्म ऋषिः। परमात्मा देवता। त्रि
प९ ष्टुप् छंदः। यज्ञोपवीतहोमे विनियोगः॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पु
रस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः। परमात्मने इ
तः१ दं न मम॥ चेहारं भणपूर्वसक्तु प्राश्न नतः परं। नवयज्ञोपवीतानि हुत्वा दत्त्वा
च धारयेदिति शौनक आह॥ नूतनब्रह्मचारिणां यज्ञोपवीत धारणांतेन वा
जीन कटिसूत्रकौपीनवस्त्रमेखला दंडाजिनानि धारयेत्॥ ॥ततः प्राणा

१७ यामादिकृत्वा॥ अग्नेःपश्चादुपविश्य नरः स्वेन तलं कुशान् आधाय॥ दर्भगर्भं ब्रह्मांज
लिं निधाय॥ कृष्यादिस्मरणांतं सर्वेषामप्याकरणे विनियोग इत्युक्त्वा॥ अग्निमी
ळे इत्यादि परिधानीयावाचनांतं प्राग्वत्कृत्वा उपाकृतावेवं यदात्र लिंस्था
न्कुशान्दक्षिणकटौ निवेश्य॥ अपउपस्पृश्य प्राणायाम्य श्च तादि होमशेषं समाप्य वि
प्रीत्यर्थं ब्राह्मणान्भोजयेत्॥ कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रयुंजते॥ ॥इ
त्युत्सर्जनोपाकरणप्रयोगः॥ ॥अथाध्ययनधर्मा लिख्यंते॥ ॥अन
ध्यायास्मृतो सिद्धान्परिहृत्याधीयते॥ यत्पूर्वमधीतं सो प्रारभेत्तस्मि
न्नहनि॥ १॥ ॥इति कारिकोक्तेः॥ ॥तथा च स्मृत्यर्थसारे ततो नंतरं १६